# shyAmalA danDakaM (kAlidAsa)

# શ્યામલાદણ્ડકં કાલિદાસવિરચિતમ્

## Document Information

Text title : shyAmalA daNDakam

File name : shyaamala.itx

Category : daNDaka, devii, dashamahAvidyA, stotra, kAlidAsa, devI

Location : doc_devii

Author : Kalidasa

Transliterated by : P. P. Narayanaswami (swami at math.mun.ca)

Proofread by : P. P. Narayanaswami (swami at math.mun.ca), srirama_at_navayuga.com, Avinash

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્યામલાદણ્ડકં કાલિદાસવિરચિતમ્

॥ અથ શ્યામલા દણ્ડકમ્ ॥

॥ ધ્યાનમ્ ॥

માણિક્યવીણામુપલાલયન્તીં
મદાલસાં મઞ્જુલવાગ્વિલાસામ્ ।
માહેન્દ્રનીલદ્યુતિકોમલાઙ્ગીં
માતઙ્ગકન્યાં મનસા સ્મરામિ ॥ ૧॥

ચતુર્ભુજે ચન્દ્રકલાવતંસે
કુચોન્નતે કુઙ્કુમરાગશોણે ।
પુણ્ડ્રેક્ષુપાશાઙ્કુશપુષ્પબાણ-
હસ્તે નમસ્તે જગદેકમાતઃ ॥ ૨॥

॥ વિનિયોગઃ ॥

માતા મરકતશ્યામા માતઙ્ગી મદશાલિની ।
કુર્યાત્ કટાક્ષં કલ્યાણી કદંબવનવાસિની ॥ ૩॥

॥ સ્તુતિ ॥

જય માતઙ્ગતનયે જય નીલોત્પલદ્યુતે ।
જય સઙ્ગીતરસિકે જય લીલાશુકપ્રિયે ॥ ૪॥

॥ દણ્ડકમ્ ॥

જય જનનિ સુધાસમુદ્રાન્તરુદ્યન્મણીદ્વીપસંરૂઢ -
બિલ્વાટવીમધ્યકલ્પદ્રુમાકલ્પકાદંબકાન્તારવાસપ્રિયે
કૃત્તિવાસપ્રિયે સર્વલોકપ્રિયે

સાદરારબ્ધસંગીતસંભાવનાસંભ્રમાલોલ-
નીપસ્રગાબદ્ધચૂલીસનાથત્રિકે સાનુમત્પુત્રિકે

શેખરીભૂતશીતાંશુરેખામયૂખાવલીબદ્ધ-
સુસ્નિગ્ધનીલાલકશ્રેણિશૃઙ્ગારિતે લોકસંભાવિતે
કામલીલાધનુસ્સન્નિભભ્રૂલતાપુષ્પસન્દોહસન્દેહકૃલ્લોચને
વાક્સુધાસેચને ચારુગોરોચનાપઙ્કકેલીલલામાભિરામે સુરામે રમે

પ્રોલ્લસદ્ધ્વાલિકામૌક્તિકશ્રેણિકાચન્દ્રિકામણ્ડલોદ્ભાસિ
લાવણ્યગણ્ડસ્થલન્યસ્તકસ્તૂરિકાપત્રરેખાસમુદ્ભૂતસૌરભ્ય-
સંભ્રાન્તભૃઙ્ગાઙ્ગનાગીતસાન્દ્રીભવન્મન્દ્રતન્ત્રીસ્વરે
સુસ્વરે ભાસ્વરે

વલ્લકીવાદનપ્રક્રિયાલોલતાલીદલાબદ્ધ-
તાટઙ્કભૂષાવિશેષાન્વિતે સિદ્ધસમ્માનિતે

દિવ્યહાલામદોદ્વેલહેલાલસચ્ચક્ષુરાન્દોલનશ્રીસમાક્ષિપ્તકર્ણૈક-
નીલોત્પલે શ્યામલે પૂરિતાશેષલોકાભિવાઞ્છાફલે શ્રીફલે

સ્વેદબિન્દૂલ્લસદ્ફાલલાવણ્ય નિષ્યન્દસન્દોહસન્દેહકૃન્નાસિકામૌક્તિકે
સર્વવિશ્વાત્મિકે સર્વસિદ્ધ્યાત્મિકે કાલિકે મુગ્દ્ધમન્દસ્મિતોદારવક્ત્ર-
સ્ફુરત્ પૂગતામ્બૂલકર્પૂરખણ્ડોત્કરે જ્ઞાનમુદ્રાકરે સર્વસમ્પત્કરે
પદ્મભાસ્વત્કરે શ્રીકરે

કુન્દપુષ્પદ્યુતિસ્નિગ્ધદન્તાવલીનિર્મલાલોલકલ્લોલસમ્મેલન
સ્મેરશોણાધરે ચારુવીણાધરે પક્વબિંબાધરે

સુલલિત નવયૌવનારંભચન્દ્રોદયોદ્વેલલાવણ્યદુગ્ધાર્ણવાવિર્ભવત્
કમ્બુબિમ્બોકભૃત્કન્થરે સત્કલામન્દિરે મન્થરે

દિવ્યરત્નપ્રભાબન્ધુરચ્છન્નહારાદિભૂષાસમુદ્યોતમાનાનવદ્યાઙ્ગ-
શોભે શુભે

રત્નકેયૂરરશ્મિચ્છટાપલ્લવપ્રોલ્લસદ્દોલ્લતારાજિતે યોગિભિઃ
પૂજિતે વિશ્વદિઙ્મણ્ડલવ્યાપ્તમાણિક્યતેજસ્સ્ફુરત્કઙ્કણાલંકૃતે
વિભ્રમાલંકૃતે સાધુભિઃ પૂજિતે વાસરારંભવેલાસમુજ્જૃમ્ભ
માણારવિન્દપ્રતિદ્વન્દ્વિપાણિદ્વયે સન્તતોદ્યદ્દયે અદ્વયે
દિવ્યરત્નોર્મિકાદીધિતિસ્તોમસન્ધ્યાયમાનાઙ્ગુલીપલ્લવોદ્ય
ન્નખેન્દુપ્રભામણ્ડલે સન્નુતાખણ્ડલે ચિત્પ્રભામણ્ડલે પ્રોલ્લસત્કુણ્ડલે

તારકારાજિનીકાશહારાવલિસ્મેર ચારુસ્તનાભોગભારાનમન્મધ્ય-

વલ્લીવલિચ્છેદ વીચીસમુદ્યત્સમુલ્લાસસન્દર્શિતાકારસૌન્દર્યરત્નાકરે
વલ્લકીભૃત્કરે કિઙ્કરશ્રીકરે

હેમકુંભોપમોત્તુઙ્ગ વક્ષોજભારાવનમ્રે ત્રિલોકાવનમ્રે
લસદ્વૃત્તગંભીર નાભીસરસ્તીરશૈવાલશઙ્કાકરશ્યામરોમાવલીભૂષણે
મઞ્જુસંભાષણે

ચારુશિઞ્ચત્કટીસૂત્રનિર્ભત્સિતાનઙ્ગલીલધનુશ્શિઞ્ચિનીડંબરે
દિવ્યરત્નામ્બરે

પદ્મરાગોલ્લસ ન્મેખલામૌક્તિકશ્રોણિશોભાજિતસ્વર્ણભૂભૃત્તલે
ચન્દ્રિકાશીતલે વિકસિતનવકિંશુકાતામ્રદિવ્યાંશુકચ્છન્ન
ચારૂરુશોભાપરાભૂતસિન્દૂરશોણાયમાનેન્દ્રમાતઙ્ગ
હસ્માર્ગ્ગલે વૈભવાનર્ગ્ગલે શ્યામલે કોમલસ્નિગ્દ્ધ
નીલોત્પલોત્પાદિતાનઙ્ગતૂણીરશઙ્કાકરોદાર
જંઘાલતે ચારુલીલાગતે નમ્રદિક્પાલસીમન્તિની
કુન્તલસ્નિગ્દ્ધનીલપ્રભાપુઞ્ચસઞ્જાતદુર્વાઙ્કુરાશઙ્ક
સારંગસંયોગરિંખન્નખેન્દૂજ્જ્વલે પ્રોજ્જ્વલે
નિર્મલે પ્રહ્વ દેવેશ લક્ષ્મીશ ભૂતેશ તોયેશ વાણીશ કીનાશ
દૈત્યેશ યક્ષેશ વાય્વગ્નિકોટીરમાણિક્ય સંહૃષ્ટબાલાતપોદ્દામ–
લાક્ષારસારુણ્યતારુણ્ય લક્ષ્મીગૃહિતાઙ્ઘ્રિપદ્મ્મે સુપદ્મે ઉમે

સુરુચિરનવરત્નપીઠસ્થિતે સુસ્થિતે
રત્નપદ્માસને રત્નસિમ્હાસને શઙ્ખપદ્મદ્વયોપાશ્રિતે વિશ્રુતે
તત્ર વિઘ્નેશદુર્ગાવટુક્ષેત્રપાલૈર્યુતે મત્તમાતઙ્ગ
કન્યાસમૂહાન્વિતે ભૈરવૈરષ્ટભિર્વેષ્ટિતે
મઞ્ચુલામેનકાદ્યઙ્ગનામાનિતે દેવિ વામાદિભિઃ શક્તિભિસ્સેવિતે
ધાત્રિ લક્ષ્મ્યાદિશક્ત્યષ્ટકૈઃ સંયુતે માતૃકામણ્ડલૈર્મણ્ડિતે
યક્ષગન્ધર્વસિદ્ધાઙ્ગના મણ્ડલૈરર્ચિતે

ભૈરવી સંવૃતે પઞ્ચબાણાત્મિકે પઞ્ચબાણેન રત્યા ચ
સંભાવિતે પ્રીતિભાજા વસન્તેન ચાનન્દિતે ભક્તિભાજં પરં શ્રેયસે
કલ્પસે યોગિનાં માનસે દ્યોતસે છન્દસામોજસા ભ્રાજસે ગીતવિદ્યા
વિનોદાતિ તૃષ્ણેન કૃષ્ણેન સમ્પૂજ્યસે ભક્તિમચ્ચેતસા વેધસા
સ્તૂયસે વિશ્વહૃદ્યેન વાદ્યેન વિદ્યાધરૈર્ગીયસે

શ્રવણહરદક્ષિણક્વાણયા વીણયા કિન્નરૈર્ગીયસે
યક્ષગન્ધર્વસિદ્ધાઙ્ગના મણ્ડલૈરર્ચ્યસે

સર્વસૌભાગ્યવાઞ્છાવતીભિર્ વધૂભિસ્સુરાણાં સમારાધ્યસે
સર્વવિદ્યાવિશેષત્મકં ચાટુગાથા સમુચ્ચારણાકણ્ઠમૂલોલ્લસદ્-
વર્ણરાજિત્રયં કોમલશ્યામલોદારપક્ષદ્વયં તુણ્ડશોભાતિદૂરીભવત્
કિંશુકં તં શુકં લાલયન્તી પરિક્રીડસે

પાણિપદ્મદ્વયેનાક્ષમાલામપિ સ્ફાટિકીં જ્ઞાનસારાત્મકં ( variation  પાણિયુગ્મદ્વયેનાક્ષમાલાગુણ)
પુસ્તકઞ્ચાઙ્કુશં પાશમાબિભ્રતી તેન સઞ્ચિન્ત્યસે તસ્ય
વક્ત્રાન્તરાદ્ ગદ્યપદ્યાત્મિકા ભારતી નિસ્સરેત્ યેન વાધ્વંસનાદા
કૃતિર્ભાવ્યસે તસ્ય વશ્યા ભવન્તિસ્તિયઃ પૂરુષાઃ યેન વા
શાતકંબદ્યુતિર્ભાવ્યસે સોઽપિ લક્ષ્મીસહસ્રૈઃ પરિક્રીડતે

કિન્ન સિદ્ધ્યેદ્વપુઃ શ્યામલં કોમલં ચન્દ્રચૂડાન્વિતં
તાવકં ધ્યાયતઃ તસ્ય લીલા સરોવારિધીઃ તસ્ય કેલીવનં
નન્દનં તસ્ય ભદ્રાસનં ભૂતલં તસ્ય ગીર્દેવતા કિઙ્કરિ
તસ્ય ચાજ્ઞાકરી શ્રી સ્વયં

સર્વતીર્થાત્મિકે સર્વ મન્ત્રાત્મિકે
સર્વ યન્ત્રાત્મિકે સર્વ તન્ત્રાત્મિકે
સર્વ ચક્રાત્મિકે સર્વ શક્ત્યાત્મિકે
સર્વ પીઠાત્મિકે સર્વ વેદાત્મિકે
સર્વ વિદ્યાત્મિકે સર્વ યોગાત્મિકે
સર્વ વર્ણાત્મિકે સર્વગીતાત્મિકે
સર્વ નાદાત્મિકે સર્વ શબ્દાત્મિકે
સર્વ વિશ્વાત્મિકે સર્વ વર્ગાત્મિકે
સર્વ સર્વાત્મિકે સર્વગે સર્વ રૂપે
જગન્માતૃકે પાહિ માં પાહિ માં પાહિ માં
દેવિ તુભ્યં નમો દેવિ તુભ્યં નમો દેવિ તુભ્યં નમો
દેવિ તુભ્યં નમઃ

॥ ઇતિ શ્યામલા દણ્ડકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by P. P. Narayanaswami (swami@math.mun.ca)
and srirama at navayuga.com, Avinash

*shyAmalA danDakaM (kAlidAsa)*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*